संस्कृत-पत्रकारिता-शताब्दी-विशेषलेखः

शारदा ७·१४ : ७-१३
(२२ मे १९६९)

# 'पण्डित'–पत्र–परिचयः

— अशोकः अक्लूजकरः,
हार्वर्ड विद्यापीठम्, अमेरिका।

इदानीं संस्कृतपत्रकारिताशताब्दीपूर्ति-समारोहः भारते प्रचलति इति शारदाङ्कात् मया अधिगतम्। यैः अस्याः पत्रकारितायाः इतिहासः अधीतः तैः आङ्गल्यां 'दि पण्डिट्' इत्याख्यया, संस्कृते च 'काशीविद्यासुधानिधिः' इत्याख्यया प्रथितं यत् पत्रं तत् प्रथमं संस्कृतं पत्रम् इति निर्णीतम्। शताब्दीपूर्तिमहोत्सवावसरे इदम् आद्यं पत्रम् उद्दिश्य किञ्चित् लेखनीचालनं कर्तुम् इच्छामि।

## साधारणं रूपम्

पण्डितपत्रस्य अङ्काः द्वयोः विभागयोः निर्देष्टुं शक्यन्ते। प्रथमे वर्षदशके प्रकाशिताः अङ्काः आद्यायां मालायाम् अन्तर्भवन्ति। सम्पादकानाम् एतन्मतपोषिणी सुस्पष्टा क्रमाङ्क-प्रदान-पद्धतिः विद्यते। एतेषाम् अङ्कानाम् आकारः इदानीन्तनानां भारतवाण्यादीनां पत्राणाम् आकारेण सादृश्यं सन्दर्शयति। अवशिष्टाः (एकनवद्विशून्यमितं क्रिस्ताब्दं यावत् प्रकाशिताः) सर्वे अङ्काः द्वितीयस्यां मालायाम् अन्तर्भवन्ति। ते खलु इदानीन्तनशारदाङ्काकाराः। पत्रप्रकाशनात् कुतः विरम्यते तत् पण्डितपत्रस्य अन्तिमे अङ्के न ज्ञापितम्। केवलम् 'अपरिहार्यैः कारणैः' इति विलिख्य सम्पादकः प्रारब्धग्रन्थपूर्तिं वाचकेभ्यः प्रतिशृणोति। प्रत्येकम् अङ्के आदौ एतत् श्लोकद्वयं वर्तते—

'श्रीमद्विजयिनीदेवीपाठशालोदयोदितः।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः।
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥"

## साम्प्रतिकेभ्यः पत्रेभ्यः विशेषाः

इदानीन्तनानि संस्कृतपत्राणि प्राधान्येन आधुनिकं संस्कृतसाहित्यं प्रकाशयन्ति। पण्डितपत्रे प्राधान्येन अभिजातं संस्कृतवाङ्मयं (साहित्यं, शास्त्राणि च) प्रकाशितं दृश्यते। इदानीन्तनानि पत्राणि यावच्छक्यम् अन्यभाषासम्पर्कं परिहरन्ति। पण्डितपत्रस्य नैकेषु अङ्केषु आङ्गलभाषामयं वाङ्मयम् आलोक्यते। प्रचलतां सर्वेषां संस्कृतपत्राणां सम्पादनभारः भारतीयेषु विद्यते। पण्डितपत्रस्य अनेके सम्पादकाः पाश्चात्त्याः आसन्। इदानीन्तनानि पत्राणि द्वितीयं ध्येयम् इति प्रायशः वैदिकधर्मप्र-



साराय हिन्दुधर्मप्रसाराय वा प्रयतन्ते। पण्डितपत्रस्य ध्येयं संस्कृतभाषारक्षणं, परम्परागतपाण्डित्यप्रोत्साहनं, भारतीयानां वैचारिकस्य धनस्य विवरणं वितरणं च इत्येवं सीमितम् आसीत्। प्रसङ्गविशेषेषु धर्माभिमानः व्यज्यते स्म, परं स कथमपि अन्यतमं ध्येयं न सञ्जातः। (पण्डितपत्रस्य मुद्रणं प्रायशः प्रमादरहितम्। मन्ये तदपि इदानीन्तनेभ्यः संस्कृतपत्रेभ्यः पण्डितपत्रं विशिनष्टि। परम् अन्तिमेषु खण्डेषु मुद्रणप्रमादाः चौखम्बा-संस्कृतग्रन्थमालायाः अचिरोदयं सूचयितुं पर्याप्ताः!!

## समानाः अंशाः

सत्सु अपि एतेषु भेदेषु पण्डितपत्रस्य संस्कृतपत्रेषु स्थानम् अपह्नोतुं न शक्यते। इदानीम् अक्रान्तिकामानां बहुसङ्ख्यानां संस्कृतोपासकानां ये चिन्तनविषयाः ते एव प्राधान्येन पण्डितपत्रपृष्ठभूषकाणां लेखकानाम्। तत्रापि प्रयतन्ते संस्कृतप्रेमिणः भाषान्तरात् संस्कृते नूतनं सुन्दरं किमपि समावेशयितुम्। तस्मिन्नपि पठ्यन्ते शास्त्रचर्चादीनां वृत्तान्ताः। तदङ्केषु अपि विवदन्ते पत्रलेखकाः प्रचलितं कमपि प्रश्नं विषयीकृत्य। तत्रापि उपलभ्यन्ते चरितनिरूपणानि मृत्युलेखाः च। तदपि पत्रं प्रयतते संस्कृताध्येतॄणां छात्राणां मार्गदर्शनाय, संस्कृतेनैव विचारसुबोधीकरणाय।

## अन्तर्भूतवाङ्मयसूचिः

अथ प्रस्तूयते मया संस्कृताध्येतॄणां सौकर्यार्थं पण्डितपत्रस्य अङ्केषु उपलभ्यानां कृतीनां सूचिः।

एषा हि सूचिः आद्येन पत्रेण अनेन संस्कृतरक्षणे कियत् महाकार्यम् अनुष्ठितं तत् प्रत्याययेत्। परम् अन्यदपि किञ्चित् पण्डितपत्रस्य माहात्म्यनिदानम्। तत् खलु अनाग्रहस्य, सांमनस्यस्य अप्रतिमं निदर्शनम्। तथैव, वाराणसीस्थैः विट्ठलशास्त्रि-बालशास्त्रि- बेचनशास्त्रि-केशवशास्त्रि-राजारामशास्त्रि प्रभृतिभिः कियत् आश्चर्यावहं ग्रन्थमुद्रणकार्यं निर्वर्तितं तदपि पण्डिताङ्कानाम् अवलोकनेनैव प्रतीयते। एतेषु तदानीन्तनेषु विद्वत्सु कीदृशी विचारसरणिः विवादसरणिः च आसीत् तदपि न पण्डितभिन्नेन संस्कृतपत्रेण ज्ञापयितुं शक्यम्।

## सूचिविषये सूचनाः

अस्यां सूचौ प्रथमः क्रमाङ्कः खण्डबोधकः, द्वितीयः च पृष्ठबोधकः। आभ्याम् अङ्काभ्यां बोधिते स्थाने कृतिमुद्रणस्य केवलमारम्भः भवति इति सूचिम् इमाम् उपयुञ्जानैः अवश्यम् अवधेयम्। एका एव कृतिः विभागशः, प्रायः सातत्येन च पण्डिताङ्केषु मुद्र्यते स्म।

पण्डिताङ्कानां ये दश खण्डाः प्रथममालान्तर्गताः ते केवलेन अङ्केन निर्दिष्टाः। ये अवशिष्टाः नवीनमालान्तर्गताः खण्डा. ते 'न' वर्ण-पुरस्कृतेन अङ्केन निर्दिष्टाः। त्रिंशोत्तरखण्डगताः कृतयः केवलं खण्ड-निर्देशपूर्वकं निर्दिष्टाः यतः तेषु खण्डेषु सम्पादकाः भिन्नां पृष्ठक्रमाङ्क-पद्धतिमाश्रयन्ते।

## अथ सूचिः (कालक्रमानुसारिणी)

**प्रथिताः कृतयः**

शालिकनाथीय प्रकरणपञ्चिका (१.१, ५. ११३) कुमारसम्भवस्य अष्टमादयः सर्गाः (१. ११) कादम्बरीकथासारः (१. १३६) प्रसन्नराघवम् (२. १२६) ईश्वरप्रत्यभिज्ञासूत्रविमर्शिनी (२. २३५) बालरामायणम् (३. ८) उपदेशसहस्त्री (३. १८९) विद्धशालभञ्जिका (६. ११७) चिन्तामणिशब्दखण्डः (६. १२७) कर्पूरमञ्जरी (७. २०) काशिका (८. २२९) यतीन्द्रमतदीपिका (न १. ११३) तन्त्रवार्त्तिकम् (न ३. ६५) चित्सुखी (न ४. ४५९) माधवीया धातुवृत्तिः (न ४. १३६; न-नवदशखण्डपूरणिका) सङ्क्षेपशारीरकम् (न ४. ११३) योगवार्त्तिकम् (५. ३९) खण्डनखण्डखाद्यम् (न ६. ६३३) शास्त्रदीपिका (न ७. ३३) श्रीभाष्यम् (न ७. ४६; न २६. ६२१)-काशिकाव्याख्या पदमञ्जरी (न १०. २४५) काव्यप्रकाशस्य परिवृत्तिव्याख्यानम्–काव्यप्रदीपः (न १०. ५४५) चित्रमीमांसा (१३. ९७) गणकतरङ्गिणी (न १४. १) तत्त्वबिन्दुः (न १४. ४९) सङ्कर्ष (ण)-काण्डम् (न १४. ५६९) वेदार्थसङ्ग्रहः (न १५. ४८९) काव्यप्रकाशः (न १८. २२७) माधवीया नामधातुवृत्तिः (न १९. २४९) लक्षणावली न्यायमुक्तावलीसहिता (न २१. ६२५) तर्कभाषा (न २२. २९७) न्यायसिद्धाञ्जनम् (न २३. ९) पदार्थतत्त्वनिरूपणम् (न २५. १६३) पदार्थतत्त्वनिरूपणटीका (न २८. ५२९) खण्डनोद्धारः (न २५. १७९) पातञ्जलसूत्रवृत्तिः (न २५. ५८३) (ब्रह्मसूत्र–) ब्रह्मामृतवर्षिणी (न २५. ६१५) विधिविवेकः न्यायकणिकासहितः (न २५. ६८७) मीमांसान्यायप्रकाशः (न २६. ८९) मीमांसापरिभाषा (न २६. २५७) ईशावास्योपनिषद् (न २७. ५५१) वाल्मीकिरामायणम् (चिकित्सिता संहिता) (न २८. ३३) पराशरस्मृतिः (न २९. १७७) सिद्धान्तशिरोमणिः (न ३०. २२५) जैनेन्द्रव्याकरणं महावृत्तिसहितम् (न ३१) शाकटायनव्याकरणं चिन्तामण्यपराभिधान-लघुवृत्तिसहितम् (न ३४)



भगवद्गीता बृहद्गीतासारार्थसङ्ग्रहापरनामधेयया गीतार्थदीपिकया व्याख्यया सहिता (न ३४) न्यायसूत्रं विश्वनाथन्यायपञ्चाननविरचित-वृत्तिसहितम् (न ३९).

**सामान्यतः अप्रथिताः कृतयः**

नरेश्वरपरीक्षा (२. ७२) हरिविलासकाव्यम् (२. ७८) काशीराजकाननशतकम् (३. १८) वृषभानुजा नाटिका (३. २५७) बालभारतमहाकाव्यम् (४. ७७) खण्डप्रशस्तिः (५. २२) भगवत्पतञ्जलिविरचितार्याः (५. १८९) तत्त्वमुक्तावली (६. ८९) गोपाललीला (६. १०८) व्याससूत्रीय (–ब्रह्मसूत्रीय) शैवभाष्यम् (६. २८७) वेदान्तकौस्तुभप्रभा (८. ३४) आत्मपुराणवर्णनम् (९. ४१) आनन्दवृन्दावन-चम्पूः (९. १०३) आनन्दमन्दाकिनी (न १. ४९८) गणरत्नावली (न २. १९२) शारीरकमीमांसान्यायसङ्ग्रहः (न ३. २७५) योगचन्द्रिका (न ३. २१६) श्रौतपदार्थनिर्वचनम् (न ४. ५०१) कैवल्यरत्नम् (न ५. १) वृत्तिवार्त्तिकम् (न १२. ४९४) जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका (न १७. २१७) तत्त्वमुक्ताकलापः (न १८. २७५) तार्किकरक्षा टीकात्रयसहिता (न २१. ६०९) सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम् (न २२. १६९) आगमप्रामाण्यं श्रीमद्यामुनिविरचितम् (न २२. ४२५) न्यायसूत्रविवरणम् (न २३. १५७) लौकिकन्यायसङ्ग्रहः (न २३. २१३) ब्राह्मस्फुटसिद्धान्तः (ज्योतिर्गणितम्) (न २३. ३०९) न्यायसिद्धान्तदीपः प्रभाटीकासहितः (न २५. २३५) वेदान्ततत्त्वविवेकः (न २५. ४०७) न्यायसारः (न २५. ४५५) भावबोधिनी नाम प्रसन्नराघवटीका (न २६. ५५८) पदार्थरत्नमाला (न २७. ६३१) सङ्कल्पसूर्योदयः नाम नाटकम् (न २८. ११३) व्याकरणदीपिका ओरम्भट्टविरचिता (न २९. ९७) न्यायसिद्धान्तमञ्जरी भट्टाचार्यचूडामणिजानकीनाथविरचिता (न २९. १२९)

## अ प मु द्रि त वै

भातं देशमथण्डमा हिमलयात् आतेसु दिव्यैर्वचैः
पण्यश्लोदपुकं पुनो गयमितुं कांटि निबन्ध्वा सतम्।
या लेकान् उपदेशति प्रतिपदं वर्णागम-व्यत्यय-
ध्वंसाद्या विकृतीः, स'भा' जयतु सा 'वाणी' 'रता'त् उत्तरा॥

(त्रयोदशं पृष्ठं द्रष्टव्यम्)

— कण्टकार्जुनः

याजुषज्यौतिषं सोमाकरसुधाकरभाष्याभ्यां सहितम् ( न २९. ३०५) शिवज्ञानबोधः (न २९. ६४९) अद्वैतदीपिका सटीका (न ३०. २५७) प्रोढमनोरमाखण्डनं चक्रपाणिदत्तविरचितम् (न ३२) महाभारततात्पर्यप्रकाशः सटीकः श्रीसदानन्दव्यासविरचितः (न ३३) भक्तिसागरः ( न ३३) मोक्षधर्मसारोद्धारः सदानन्दव्यासविरचितः (न ३४) जैनवार्त्तिकवृत्तिः (न ३६) रसार्णवः शङ्करकविविरचितः (न ४२)

**आङ्ग्ल्या अनूदिताः प्रथिताः कृतयः**

( ऋग्वेदरामायण-महाभारतरघुवंशकुमारसम्भवानाम् अंशतः अनुवादाः प्रथममालान्तर्गतेषु पण्डिताङ्केषु असातत्येन आविर्भवन्ति । नूतनायां मालायां पञ्चदशादिखण्डपूरणिकात्वेन ग्रिफिथ्कृतः अथर्ववेदानुवादः उपलभ्यते । एतत् सर्वम् इदानीम् अनुपयोगित्वात् सूचौ न समावेश्यते । ) साहित्यदर्पणदशमपरिच्छेदः (अयं मिरर् ऑफ् काम्पोझिशन् इत्येतस्मिन् ग्रन्थानुवादे उपलभ्यते) (१. ५३) मेघदूतम् (२. १८४) योगसूत्रम् (३. ८८) वैशेषिकसूत्रम् (३. १८५) सिद्धान्तमुक्तावली (११. १२) भाषापरिच्छेदविषयिणी (६. १०१) वेदान्तसारविद्वन्मनोरञ्जिनी (६. २३२) वृत्तरत्नाकरः (९. ४५) सर्वदर्शनसङ्ग्रहः (९. १६२) न्यायदर्शनं वात्स्यायनभाष्यसहितम् (न २. ६०) ब्रह्मसूत्रतात्पर्यविवरणम् (न ३.४६९) वेदान्तपरिभाषा (न ४. १०३) पञ्चदशी ( न ५. ६०५ ) वेदान्ततत्त्वसारः ( न ९. १८५ ) सिद्धान्तलेश-(सङ्ग्रहः) ( न २१. ५९३ ) पञ्चपादिका (न २३. १८९) सम्बन्धवार्त्तिकम् (न २३. ४४५) पदार्थधर्मसङ्ग्रहः –न्यायकन्दलीसहितं प्रशस्तपादभाष्यम् ( न २५. ८४७ ) अद्वैतसिद्धिः ( न २८ ३२१ ) ईशावास्योपनिषद् ( न ३७ ) केनोपनिषद् ( न ३८ ) कारिकावली-मुक्तावली (न ३९)

**आङ्ग्ल्या अनूदिताः सामान्यतः अप्रथिताः कृतयः**

अद्वैतमकरन्दः स्वयम्प्रकाशकृतटीकासहितः (८. ९) साङ्ख्यतत्त्वप्रदीपः (९. ४३) शुल्वसूत्रं बौधायनप्रणीतं सटीकम् (९. २९२) कातीयं शुल्वपरिशिष्टम्(न ४. ९५) (वेदान्त-)सिद्धान्तमुक्तावली(न ११.३३)

**संस्कृतेन अनूदिताः कृतयः**

ज्ञानसिद्धान्तचन्द्रिका ( बक्ले जॉर्ज–'ट्रिटाइस् कन्सर्निङ्ग दि प्रिन्सिपल्स ऑफ् ह्यमन् नॉलेज् ) (८.६८) प्रोषितप्रियसमागमः (गोल्ड स्मिथ्– 'हर्मिट्') (९. २३८) मानवीयज्ञानविषयकं शास्त्रम् (लॉक्– एसे कन्सर्निङ्ग् ह्यूमन् अण्डरस्टॅण्डिङ्ग) (१०. २५९)



**पण्डिताङ्केषु मुद्रिताः महत्त्वपूर्णाः निबन्धाः**

मानमन्दिराभिधवेधालयवर्णनम् ( १. ७ ) रिमार्क्स ऑन प्रो. गोल्डस्टकर्स एन्लार्ज्ड एडिशन् ऑफ् विल्सन्स संस्कृत डिक्शनरी (१. ९) ऑन् दि न्याय सिस्टम् ऑफ् फिलॉसफी ॲण्ड दि कॉरस्पॉण्डन्स ऑफ् इट्स डिव्हिजन्स वुइथ् दोज् ऑफ् मॉडर्न सायन्स ( १. २२ ) सायनवादः (१. ३२) कालिदास ॲण्ड एम्. हिप्पोलिटे फॉशे (१. ३७) मनुज् बुल् (१. ५६) परिभाषेन्दुशेखर टिप्पणीसारासारविवेकः (१.६२) कुमारसंभवोत्तरखण्डवर्णयितृपण्डितान् प्रति (१. ६५ द्रष्टव्यम् १. ११, १४१) दि इटर्निटी ऑफ् साउण्ड्: ए डॉग्मा ऑफ् दि मीमांसा (१. ६८) प्राचीनज्योतिःशास्त्राचार्याशयवर्णनम् (१. ८२) दि थ्रेड् ऑफ् गौतमज् ॲफॉरिझम्ज ( १. ९९ ) कणादाक्षपादौ ( १. ११३ ) शुष्ण ॲण्ड सिक्नॉस् ( Cycnos )(१. ११८) हिम् ( Hymn ) ॲण्ड् सुम्न (१.११८) भट्टिकाव्य (१. ९अ पूरणिका) यथोद्देशकार्यकालपक्षोपपादकपरिभाषेन्दुशेखरटिप्पणम् (१. १३९) दि पण्डिट्स ॲण्ड देअर मॅनर ऑफ् टीचिङ्ग (१. १४६; ३. २२, २०७, २५०) दि रिलेशन्स ऑफ् दि प्रीस्ट्स टु दि अदर क्लासेस् ऑफ् इण्डियन् सोसायटी इन् दि वेदिक् एज (१. १५०) कुमारसम्भवनूतनावृत्तिपरीक्षणम् ( आङ्ग्लीमयम् ) (१. १६२) विट्ठलशास्त्रीजोशीजीवनवृत्तान्तः (१. १७७) साङ्ख्यशास्त्रम् (२. ११) सिद्धान्ततत्त्वविवेकपरीक्षा (२. ३२, २०१) इन्दिरापतिपरीक्षा यथोद्देशकार्यकालपक्षविषये (२. ३७) ए लिरिक् ऑफ् जयदेव ( २. ४७) दि जिस्ट् ऑफ् दि वेदान्त ॲज् ए फिलॉसफी (२.४७) ए लेटर् ऑन् आयडोलेट्री (२. ८८) ऑन् दि ऑण्टॉलजी ऑफ् दि वेदान्त ( २. ९१ ) न्यायस्वरूपम् (२. १०९) माय् ड्यूटी टोवर्ड्ज माय् नेबरः ख्रिश्चन् ॲण्ड् ओल्ड इण्डियन् पॅरलल् (२. १६० ) भाऊदाजिना शोधितं महारोगभैषज्यम् (२. २७१) विल्यम्म्यूरस्य संस्कृतम् अभिभाषणम् (३. १७) कालिदासः शैवपुराणं च (३. १९) यथोद्देशकार्यकालपक्षटिप्पणीपरीक्षाशेषः ( ३. १०८ ) बनारस् : एन्शण्ट ॲण्ड मिडीव्हल् (३. १३७) इन्द्र ॲज् रिप्रेझेण्टेड् इन् दि हिम्स ऑफ् दि ऋग्वेद, ए मेट्रिकल् स्केच् (३. १८६) विधवोद्वाहः (३. २२२, २६३; ४. १०९; ५. १०३, १५७) 'अरुष' (४. ११०) सायणभाष्यसमर्थनम् (४. ११०, ११४) दि भरुस (ए ट्राइब्) (४. १६०) असित- ॲण्ड बुद्ध ऑर् दि इंडिअन् सिमेऑन् (५. ३१७) धर्मारामभिक्षुः (७. ५५) प्रा. गोल्डस्टकरः (७. ५६) कतिपयप्रश्नविचारः (गणित-

शास्त्रम्) (७. १०३; न. ३. ३११) साङ्ख्यकौमुदीं निमित्तीकृत्य (७. १६८) महादेवस्वामि-जीवनवृत्तान्तः (७. १८५) अॅन् इण्ट्रोडक्शन् टु इंडिअन फिलॉसफी : ए ट्रॅन्सलेशन् फरॉम् दि न्यायपदार्थतत्त्व ऑफ् हरिकिशोर तर्कवागीश (९. २४३) ए सो-कॉल्ड कॉण्ट्रॅडिक्शन इन् दि शाङ्करभाष्य (१०. २३) राजारामशास्त्री कार्लेकर (१०. १२१) कालिदासः नैषधीयकर्ता श्रीहर्षः च – पण्डितसभा (न १. ४७) ईश्वर-सर्वज्ञता (न १. २५३) विज्ञानमेवैकं तत्त्वम् – पण्डितसभा (न २. २३८) दि वेदान्तिक् कन्सेप्शन् ऑफ् ब्रह्म (न ३. ४४४) शाश्वत-धर्मदीपिका (न ३. ४३२, न ४. ५५) आत्मसोपानम् (न ४. १४५) बालशास्त्रिजीवनवृत्तान्त (न ४. २९१) दि हिस्टरी ऑफ् दि मॅन्युस्क्रिप्ट ऑफ् नृसिंहप्रसाद (न ५. ३७७) परिभाषेन्दुशेखरस्य अकाण्डताण्डव-टीका (न ६. ५४१) विचारमाधुकरी (भारतेतिहासविचारः) (न ६. २७३) कॉपरप्लेट ग्रॅण्ट ऑफ वैद्यदेव किंग ऑफ कामरूप (न १५. ३३) थ्री कॉपरप्लेट ग्रॅण्टस ऑफ गोविन्दचन्द्र ऑफ कनोज (न–पञ्चदश-खण्डपूरणिका) स्नेहपूर्तिः (रामानुजमतम् ) (न १७. ८९) स्नेहपूर्ति-परीक्षा (न १७. ५०५) दिग्मीमांसा (न २१. २७३)

* * *

---

राष्ट्रदेवपूजनार्थं बलोपासनम् । बलोपासनार्थं सात्त्विकान्नसेवनम् ।
तदर्थं त्वर्यताम्

**का का ह ल वा ई**

१ दत्तमन्दिरम् बुधवार पुणें २      २ डेक्कन जिमखाना पुणे २

---

## 'अपमुद्रितवै' इत्येतस्य 'संस्कृतवै' —

'भारतं देशम् अखण्डम् आ हिमालयात् आसेतु दिव्यैर्वचोभिः
पुण्यश्लोकपदं पुनर् गमयितुं कटिं निबध्य सततम् ।
या लोकान् उपदिशति ...'

स'भा' 'रता'त् उत्तरा 'वाणी'
= भा + रत + वाणी